संस्कृत-भवितव्यम्

● निरन्तरम् ऊनसप्ततिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

वर्षम् ६९, अङ्कः ४२
दि. १८ जानेवारी २०२०
पौष कृ. ९
शके १९४१, युगाब्द ५१२१

ISSN 0038-147X
ISSN : 0581-4731

अङ्क-मूल्यम् रु. ५/- | वा. शु. : रु. २५०/- | PRINTED MATTER | वृत्तपत्र-पञ्जीवन-संख्या RN 11454/1957

संस्थापक-सम्पादकः
स्व. डॉ. श्री. भा. वर्णेकर

प्रधान-सम्पादिका
डॉ. लीना रस्तोगी

डाकपेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9

सम्पादिका
डॉ. वीणा गानु (९८२२५४४४४६)

सहसंपादिकाद्वयम्
डॉ. शारदा गाडगे, श्रद्धा तेलङ्ग

प्रबन्धिका - डॉ. रेणुका करन्दीकर

मकर-सङ्क्रान्तपर्वणि शुभाशंसनम्!

तद्दिव्यमव्ययतमं तमसः परस्ताद्
भर्गो महद् भजवतः सवितुर्वरेण्यम्।
सञ्जीवनं सकलभूतलजीवभाजां
भद्रङ्करं मकरसङ्क्रमणे तवाऽस्तु॥

● प्रज्ञाभारती डॉ. वर्णेकरः

सुदीप्ततेजा रविरात्मदीप्त्या
राश्यन्तरे भाति समस्तचक्षुः।
तथाऽत्मदीप्त्या सकला भवन्तो
विभ्राजमानाः सुस्निग्धो भवन्तु॥

● डॉ. पेन्ना मधुसूदनः

वार्ता। ■ **अपूर्वं प्राच्यविद्या-सम्मेलनम्** सुसम्पन्नं भानुवासरे १२-जानेवारी-दिनाङ्के अपराह्णे नागपुर-महानगरे रेशीमबाग-क्षेत्रे, यस्मिन् किल न केवलं भारतस्य विभिन्नेभ्यः स्थानेभ्यः, विदेशेभ्योऽपि सहस्राधिकाः विद्वांसः, प्राध्यापकाः, संशोधकाः, वदान्याश्च प्रतिनिधयः दिनत्रयं यावत् चर्चा-व्याख्यान-सांस्कृतिकोपक्रमान् संसाधितवन्तः। 10-जानेवारी-दिनाङ्के प्रातः भारतस्य उपराष्ट्रपतिः व्यङ्कय्या-नायडुवर्यः सम्मेलनमिदं समुद्घाटितवान्, तदा केन्द्रमन्त्री गडकरी-नीतीन्द्रः, महाराष्ट्रस्य मन्त्री डॉ. राऊत-नीतीन्द्रः, डॉ. पटेल-गौतमः, कुलगुरुः डॉ. वरखेडी-श्रीनिवासः प्रभृतयः समयोचितं भाषणमकुर्वन्। ततश्च अपराह्णे शोधपत्राणि प्रस्तोतुं नैकानि सत्राणि, विशिष्टव्याख्यानानि सायङ्काले च संस्कृत-नाट्यप्रयोगाः अभवन्।

--- अग्रे चतुर्थे पृष्ठे

उद्घाटनसमारोहः

भवितव्यम् अङ्कविशेषस्य विमोचनम्

परिषदः शताब्दमनुसृत्य पत्रप्रेषविभागद्वारा आवरण लोकार्पणम्

पुस्तक-दिण्डियात्रा

संस्कृत-पत्रकारिता-विषयस्य सत्रारम्भे डॉ. बलदेवानन्द-सागरं सभाजयन् सभासचिवः

प्रकाशकः
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिम: उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१.
०७१२-२५३१५५२
www.sanskritbps.org

CORE BANKING FACILITY :
Bank : SBI, Dharampeth, Nagpur
Name : Sanskrit Bhasha Pracharini Sabha
A/c No. : 30362855441
IFSC/CIF Code : SBIN0004872

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

अपूर्वः ज्ञानयज्ञः

ईसवीयं २०२० तमं वर्षं सर्वेषां - विशेषतस्तु विदर्भ-वासिनां - सारस्वतोपासकानां कृते चिरस्मरणीयं भविष्यतीति निश्चप्रचम्। अखिल-भारतीय-प्राच्य-विद्या-परिषदः शतक-पूर्तिमहोत्सवः तत्र कारणं यस्य पञ्चाशत्तममधिवेशनम् अत्र नागनगर्याम् अस्य वर्षस्य प्रथमे एव मासे सम्पन्नम्। सर्वार्थैः परिपूर्णमेतत् सम्मेलनं नाम अभूतपूर्वः कोऽपि ज्ञानयज्ञः खलु, यस्य अध्वर्युरासीत् कविकुलगुरु-कालिदास-विश्वविद्यालयः। प्रथमकुलगुरुणा डॉ. पङ्कज-चान्दे-वर्येण अस्य विश्व-विद्यालयस्य बीजारोपणं कृतं, तदनु डॉ. उमा-वैद्य-वर्यया द्वितीय-कुलगुरु-रूपेण तस्मै बीजाय उर्वरकं प्रदत्तम्। इदानीं तु युवकुलगुरोः प्रा. वरखेडी-श्रीनिवासवर्यस्य सूक्ष्मेक्षिकायुतेन सपरिश्रमेण उत्साहेन पुष्पित-पल्लवितोऽयं विश्वविद्यालयः। नवनवीनकार्यार्थं सदैव बद्धपरिकरोऽयं युवकुलगुरुः अस्य बृहदायोजनस्य गुरुभारं लीलया ललिततया च सोढवान्।

त्रिदिवसात्मकेऽस्मिन् विद्वत्सम्मेलने भारतस्य विविध-प्रदेशेभ्यः १३०० विद्वज्जनाः समायाताः, १०२२ शोधनिबन्धाश्च तत्र प्रस्तुताः। परन्तु न केवलं सङ्ख्याबाहुल्यकारणाद् एतत् सम्मेलनमपूर्वम्, अपि तु व्यवस्थाकारणात्। भिन्नभिन्न-विषयाणां कृते १७ कक्षाः कल्पिताः आसन्, येन प्रत्येकं निबन्धप्रस्तोता पर्याप्तं समयं प्राप्तवान्, श्रोतारोऽपि सन्तुष्टाः आसन्, इति विशेषत्वेन उल्लेखनीयम्।

मा. व्यङ्कय्या-नायडु-महोदयस्य करकमलाभ्याम् उद्घाटनमिति परिषद्-यशः-फलके प्रथमः बिन्दुः। विविधतायाम् एकतां पश्यन् नायडुवर्यः ज्ञानस्य 'जिज्ञासा-संस्काराः-अनुशासनं-मातृभाषया शिक्षणम्' इति चतुर्विधम् आधारं प्रतिपाद्य ज्ञानस्य संरक्षणार्थं ज्ञानदानार्थं च प्रैरयत्। 'Share & Care' इति तस्य सन्देशः। तत्र अध्यक्षीये भाषणे वरखेडी-महोदयेन प्रत्यपादि यत् 'प्राचीनसंस्कृतेः प्रेरणां प्राप्य, तान्येव जीवनमूल्यानि उज्वलभविष्यत्कालार्थं योजनीयानि। परन्तु प्राच्यसंस्कृतेः मूल्याङ्कनं पाश्चिममानदण्डैः नैव भूयात्' इति सः साग्रहं प्रावोचत्।

अस्य सम्मेलनस्य केचिद् वैशिष्ट्यपूर्णाः अंशाः अवश्यं परिशीलितव्याः। ये प्रायः अन्यत्र सभा-सम्मेलन-अधिवेशनादिषु न दृश्यन्ते, येषां च कारणात् सम्मेलनमिदम् अभूतपूर्वताम् अभजत्। ते यथा -

१) परिषदः पूर्वसन्ध्यायां चतुःशतमितानां शालेय-महाविद्यालयीनच्छात्राणां सहभागेन आयोजिता ग्रन्थशोभायात्रा।

२) उद्घाटनात् पूर्वं प्रदर्शिताः लघुचित्रपटः (प्राच्यविद्या-परिषत्प्रदर्शकः)।

३) पत्रप्रेषणविभागपक्षतः (Postal department) विमोचितं वितरितं च विशेषम् आवरणं (special envelope) यस्मिन् परिषदः विश्वविद्यालयस्य च सचित्रं नाम मनोहारितया अङ्कितम्।

४) विविधस्थानेभ्यः समागतानां प्रकाशनसंस्थानां सुसज्जानि ग्रन्थ-प्रदर्शन-विक्रयण-केन्द्राणि।

५) प्राच्यविद्यासंरक्षणार्थं कृतभूरिपरिश्रमाणां मनीषिणां 'जीवनव्रतिं' पुरस्कारेण सभाजनम्।

६) पण्डितैः अध्येतृभिश्च प्रणीतानां १११ शोधग्रन्थानां मुद्रणं लोकार्पणं च।

७) समग्रकालिदासवाङ्मयस्य मराठीभाषया अनुवादकार्ये सहभागिनां सम्पादकानाम् अनुवादकानां च सभाजनम्।

८) संस्कृत-पत्रकारिता, संस्कृत-अध्यापनशास्त्रम् (Pedagogy), तथैव मराठीसाहित्यं संस्कृतिश्च इति नूतनविषयान् उद्दिश्य शोधनिबन्धाः।

अपरे आकर्षणबिन्दवः

वेदविदां शास्त्रार्थचर्चा, अन्यान्यशास्त्रविदां महामहिम-शालिनां षोडशविदुषां चिन्तनपूर्णानि सुश्राव्याणि विशेष-व्याख्यानानि, प्रतिभावतां कविवराणां स्वपरिप्लुतवाण्या सुसम्पन्ना काव्यगोष्ठी च इत्यपरं खलु आकर्षणबिन्दुत्रयम् अस्य सम्मेलनस्य। अखिलं किल श्रवणपुटपेयस्य, अमृतरसस्य आस्वादनम्। यद्यपि सर्वेषां नामोल्लेखे, तद्गतानां रसास्वादनं समीक्षां वा कर्तुं नात्र अवसरः, तथापि विद्वद्गराणां विचार-मन्थनाद् उद्भूतं सारभूतं नवनीतं समासेन अत्र उपस्थाप्यते। तदित्थम् -

- शिक्षा नवनवोन्मेषशालिनी, अनुसन्धानपरा च भवतु। (मा. उपराष्ट्रपतिः नायडुवर्यः)
- अस्माकं भविष्यत्कालः प्राच्यमूल्याधिष्ठितो भवतु। (डॉ. वरखेडीवर्यः)
- आत्मन्यक्कृतिः (self-denial) सर्वथा परिहार्या। (डॉ. उमा वैद्य, पूर्वकुलगुरुः)
- पाश्चिम-मानदण्डैः-उपकरणैर्वा अस्माकं मूल्यनिर्धारणं नैव भवेत्। (डॉ. वरखेडी, डॉ. उमा वैद्य)
- शिक्षणं सर्वतोमुखं (multi-disciplinary) भवेत्, न सङ्कायाभिमुखम् (faculty-wise)। (डॉ. सत्पथी, डॉ. अतुल कोठारी)

--- अग्रे चतुर्थे पृष्ठे

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः
100th Year • 50th Session NAGPUR Session • 10-12 Jan. 2020
Kavikulaguru Kalidas Sanskrit University
All India Oriental Conference
अखिलभारतीयप्राच्यविद्यासम्मेलनम्